मन्दं स्यात् स्वल्पविण्मूत्रं दोषत्रयविदाहकृत् ॥
यत् सम्यग् घनतां यातं व्यक्तं स्वादुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥
यत्तिरोहितमाधुर्य्यं व्यक्ताम्लं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥
तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तपित्तपुष्टिकरं परम् ॥"
इति भावप्रकाशः ॥ * ॥

"लवणमधुरसर्पिःशर्करासुद्गधात्री-
कुसुमरसविहीनं नैतदश्नन्ति नित्यम् ।
न च शरदि वसन्ते नोष्णकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि नाद्यात् ॥
त्रिकटुकयुतमेतद्राजिकाचूर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्धुक्षणञ्च ।
तुहिनशिशिरकाले सेवितञ्चातिपथ्यं
रचयति तनुदार्ढ्यं कान्तिसत्वञ्च नृणाम् ॥
दधिमधुरमीषदम्लं वाहितञ्च नात्युष्णम् ।
यावद् यावन्मधुरं दोषहरं तावदुष्णमिदम् ॥"
इति राजनिर्घण्टः ॥ * ॥

"दधि यत् स्वादु तन्मेदःकफाभिष्यन्दकारणम् ।
दध्यम्लमतियद्रक्तदूषणं कफपित्तकृत् ॥
विदाहि स्वल्पविण्मूत्रं मन्दजातं त्रिदोषकृत् ।
दधि त्वसारं रूक्षन्तु ग्राहि विष्टम्भि वातलम् ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"
इति राजवल्लभः ॥ * ॥

(ऋतुभेदे दधिविशेषगुणा यथा,—
"शारदं दधिगुर्व्वम्लं रक्तपित्तविवर्द्धनम् ।
शोफं तृष्णां ज्वरं शूलं करोति विषमज्वरम् ॥
इति शारददधिगुणाः ॥ * ॥
गुरु स्निग्धञ्च मधुरं कफकृद्बलवर्द्धनम् ।
वृष्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिवृद्धिदम् ॥
इति हैमन्तदधिगुणाः ॥ * ॥
शैशिरं सघनञ्चाम्लं मधुरं गुरु एव च ।
वृष्यं बलकरं पित्तश्रमापहरणं परम् ।
इति शैशिरदधिगुणाः ॥ * ॥
वासन्तं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकम् ।
बलवृद्धीर्य्यदा प्रोक्तं वसन्ते न प्रशस्यते ।
इति वासन्तदधिगुणाः ॥ * ॥
लघु चाम्लं भवेद्ग्रीष्मे चात्युष्णं रक्तपित्तकृत् ।
शोषभ्रमपिपासाकृद्दधियुक्तं न ग्रीष्मके ॥
इति ग्रीष्मदधिगुणाः ॥ * ॥
वार्षिकं हितकृत् प्रोक्तं दधि शस्तं न दोषलम् ।
शोषवातभ्रमान् हन्ति श्रमातीसारनाशनम् ॥"
इति वार्षिकदधिगुणाः ॥ * ॥
"हिक्काश्वासक्षीणार्शोनामतिसारे भगन्दरे ।
शस्तं प्रोक्तं दधि ह्येषां लवणेन विमूर्च्छितम् ॥
इति दधिभोजनविधिः ॥" * ॥
इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

"रोचनं दीपनं वृष्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं वृंहणं दधि ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"
"त्रिदोषं मन्दकं जातं वातघ्नं दधि शुक्रलम् ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥

"दधि तु मधुरमम्लमत्यम्लञ्चेति तत्कषायानुरसं स्निग्धमुष्णं पीनसविषमज्वरातिसारारोचकमूत्रकृच्छ्रकार्श्यापहं वृष्यं प्राणकरं माङ्गल्यञ्च ॥
महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणम् ॥
विदाहि स्वल्पविण्मूत्रं मन्दजातं त्रिदोषकृत् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघुवातक्षयापहम् ॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।
विपाके मधुरं वृष्यं वातपित्तप्रसादनम् ॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदोष्ट्रिकं दधि ॥
वातमर्शांसि कुष्ठानि क्रिमीन् हन्त्युदराणि च ।
कोपनं कफवातानां दुर्नाम्नाञ्चाधिकं दधि ॥
रसे पाके च मधुरमत्यभिष्यन्दि दोषलम् ।
दीपनीयमचक्षुष्यं वाड़वं दधि वातलम् ॥
रूक्षमुष्णं कषायञ्च कफमात्रापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ॥
कषायानुरसं नाग्या दधि वर्च्चोविवर्द्धनम् ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं वृंहणं न च पित्तकृत् ॥
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
शृतात् क्षीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः ॥
वह्नेर्विधमनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
धारणकर्त्तरि, त्रि । इति सुखबोधम् ॥

दधिकूर्च्चिका, स्त्री, (दधिजाता कूर्च्चिका ।) अर्द्धोदकोष्णदुग्धे दध्यम्लसंयोगात् जाता । इति केचित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाता इत्यन्ये ॥ छेना इति भाषा । अस्या गुणाः । वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्या यथा,—
"दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्च्चिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

दधिचारः, पुं, (दधिं चालयति विलोड़यतीति । दधि+चल+णिच्+अण् । लस्य रत्वम् ।) दधिमथनदण्डः । तत्पर्य्यायः । वैशाखः २ तक्राटः ३ करघर्षणः ४ । इति हारावली ।३४॥

दधिजं, क्ली, (दध्नो जायते इति । जन+"पञ्चम्यामजातौ ।" ३ । २ । ९८ । इति डः ।) नवनीतम् । इति राजनिर्घण्टः ॥ (नवनीतशब्देऽस्य विशेषो ज्ञातव्यः ॥)

दधित्थः, पुं, (दधिवर्णो द्रवस्तिष्ठत्यस्मिन्निति । स्था+"सुपिस्थः ।" ३ । २ । ४ । इति कः । पृषोदरादित्वात् साधुः ।) कपित्थः । इत्यमरः । २ । ४ । २१ ॥ (यथा,—
"तद्वद्दधित्थविल्वाम्रं जम्बुमध्यैः प्रपञ्चयेत् ॥"
इति वाभटे चिकित्सास्थाने नवमेऽध्याये ॥
"दधित्थविल्वचाङ्गेरी तक्रदाड़िमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाञ्चमूलिका ॥"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

दधित्थाख्यः, पुं, (दधित्थं आख्याति कपित्थद्रवं अनुकरोतीति । आ+ख्या+कः ।) शरलद्रवः । इति रत्नमाला ॥ लोवान् इति भाषा ॥

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दानार्थदध्यादिनिर्म्मिता धेनुः । यथा, वराहपुराणे ।
"दधिधेनोर्म्महाराज ! विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ! ॥
गोचर्म्ममात्रे तु पुनः पुष्पप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां कृष्णाजिनकुशोत्तराम् ॥
दधिकुम्भं सुसंस्थाप्य सदा धान्यचयोपरि ।
चतुर्थांशेन वत्सन्तु सौवर्णमुखमण्डितम् ॥
आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम् ।
ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ॥
क्षमादिगुणयुक्ताय दद्यात्तां दधिधेनुकाम् ।
पुच्छदेशोपविष्टस्तु मुद्रिकाकर्णमात्रकैः ॥
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमनुस्मरेत् ।
दधिक्राव्णेतिमन्त्रेण दधिधेनुं प्रदापयेत् ॥
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ! ।
एकाहारो दिनं तिष्ठेद्दध्ना च नृपनन्दन ! ॥
यजमानो वसेद्राजन् त्रिरात्रञ्च द्विजोत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
यत्र क्षीरवहा नद्यो यत्र पायसकर्द्दमाः ।
मुनय ऋषयः सिद्धास्तत्र गच्छन्ति वैधुदाः ॥
य इदं श्रावयेद्भक्त्या शृणुयाद्वापि मानवः ।
सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति ॥"

दधिपुष्पिका स्त्री, (दधीव शुभ्रं पुष्पमस्याः । कप् । टापि अत इत्वम् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥

दधिपुष्पी, स्त्री, (दधीव पुष्पमस्याः । जातित्वात् ङीष् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

दधिफलः, पुं, (दधीव शुभ्रो द्रवः फले यस्य ।) कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ॥

दधिमण्डः पुं, (दध्नः मण्डः ।) मस्तु । इति रत्नमाला ॥ मात् इति भाषा ॥

दधिमण्डोदः पुं, (दधिमण्ड इव उदकं यत्र । उदकस्य उदादेशः ।) दधिसमुद्रः । (यथा, भागवते । ५ । १ । ३३ ।
"क्षीरोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः ॥")